वैदिक शान्तिः मन्त्राः

ॐ वाङ् मे मनसि प्रतिष्ठिता, मनो मे वाचि प्रतिष्ठितम्, आविरावीर्म एधि, वेदस्य म आणीस्थः, श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान् संदधामि, ऋतं वदिष्यामि, सत्यं वदिष्यामि, तन्मामवतु, तद्वक्तारमवतु, अवतु माम्, अवतु वक्तारम ।। ॐ शान्तिः शान्तिः शान्तिः ।।

ॐ भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति न पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु । ॐ शान्तिः शान्तिः शान्तिः ।।

ॐ आप्यायन्तु ममांगानि, वाक्प्राणश्चक्षुः श्रोत्रमथ बलमन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदं । माऽहं ब्रह्म निराकुर्यां, मा ब्रह्म निराकरोदनिराकरणमस्तु, अनिराकरणमेऽस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि संतु ते मयि संतु । ॐ शान्तिः शान्तिः शान्तिः ।।

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं नो इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे ।

नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ॐ शान्ति: शान्ति: शान्ति: ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्ति: शान्ति: शान्ति: ।

ॐ पूर्णमद: पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्ति: शान्ति: शान्ति: ॥

मंगलाचरण

~~(हमारे रविवासरीय प्रात: सत्संग की प्रार्थना)~~

ॐ ब्रह्मानन्दं परम सुखदं केवलं ज्ञानमूर्ति
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सत्गुरुं तं नमामि ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत् पदं दर्शितं येन तस्मै श्री गुरुवे नम: ॥

नारायणं पद्मभवं वसिष्ठं
शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं
गोविन्दयोगीन्द्रमथास्यशिष्यम् ।
श्री शंकराचार्यमथास्यपद्म-
पादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्तिककारमऽन्यान्
अस्मद् गुरूणसन्ततमानतोऽस्मि ॥

ॐ शं नो मित्र: शं वरुण: । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पति: । शं नो विष्णुरुरुक्रम: । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मवदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ओं शान्ति: शान्ति: शान्ति: ॥

ओं सह नाववतु सह नौ भुनक्तु । सह वीर्यंकरवावहै । तेजस्विनावधीतमस्तु माविद्विषावहै । ओं शान्ति: शान्ति: शान्ति: ॥

पुरुषसूक्तम्

सहस्रशीर्षा पुरुष: सहस्राक्ष: सहस्रपात् ।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद् दशांगुलम् ॥

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥
एतावानस्य महिमातो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥
त्रिपादूर्ध्वं उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥
तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजंत साध्या ऋषयश्च ये ॥
तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे ।
छंदांसि जज्ञिरे तस्माद यजुस्तस्मादजायत ॥
तस्मादश्वा अजायंत ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥
ब्राह्मणोऽस्य मुखमासीद बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायत ॥
नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकां अकल्पयन् ॥

दो शब्द

लोकोपकार में लगे देवर्षि नारद के भक्ति-सूत्र के अनुसार 'ईश्वर का भजन' करने को ही भजन अथवा आराधना कहते है — 'भक्तिभंजनम्'। जगद्गुरु आद्य शकराचार्य 'ईश्वर-चिन्तन' को ही भक्ति- कहते हैं। स्वयं भगवान श्री कृष्ण ने अपने सखा उद्धव जी से कहा कि ईश्वर के प्रति प्रमा·माद को ही भक्ति कहते हैं। ऐसा भक्त त्रिभुवन को पावन करता है :—

वाग्गद्गदा द्रवते यस्य चित्तं
रुदत्यभीक्ष्णं हसति क्वचिच्च।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥

'ईश्वर-प्रेम से जिसकी वाणी गद्गद होती है, चित्त ईश्वर प्रेम से द्रवित होता है जिसके उद्रेक से वह कभी रो उठता है और कभी हंस पडता है; इस कारण लाज को बिल्कुल ही भूल कर कभी ईश्वर-प्रेम में गाने तथा नाचने लगता है। ऐसा वह मेरा भक्त, तीन भुवनों को पवित्र करता है।'

सच्चे भक्त के लिए कोई कडे शर्त नहीं हैं। भगवान् स्वयं कहते हैं—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रियतात्मनः ॥

भगवान केवल भाव का भूका है। एक आर्तनाद से, एक दिल की पुकार से, एकतान मन के चिन्तन से भगवान का कोमल से भी कोमल हृदय पसीजता है। ऐसे भक्त को वह सर्वस्व अर्पण करता है। बस भक्त और भगवान एक (अद्वैत) हो जाते हैं।

इसी भाव - भक्ति को जगाने वाले पद्य इस 'आराधना' में विशेष ध्यान से चयन करके दिए गये हैं। वैदिक पाठ तथा संस्कृत भाषा में सुन्दर स्तुति - पाठ के अतिरिक्त इस में कश्मीरी, हिन्दी एवं बंगला भाषाओं में भी भजन दिए हैं ताकि भक्तजन इस से लाभान्वित हों।

गायत्री मंत्र

ॐ भूर्भुवः स्वः
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात् ॥

ॐ तीन लोकों का स्वामी, स्वयं प्रकाश चित्सूर्य, जो वर्णन करने योग्य है, हमें निर्मल बुद्धि दे जिससे हम कल्याण को प्राप्त हों ॥

तू ने हमें उत्पन्न किया, पालन कर रहा है तू।
तुझ से ही पाते प्राण हम, दुःख और कष्ट हरता तू।
तेरा महान् तेज है, फैल रहा सभी स्थान।
सृष्टि की वस्तु - वस्तु में, हो रहा है विद्यमान।
तेरा ही धरते ध्यान हम, मांगते हैं यही दया।
ईश्वर हमारी बुद्धि को, श्रेष्ट मार्ग पर चला।

अनुक्रमणिका

सं०	विषय	पृष्ट
1.	वैदिक शान्तिः मन्त्रः (वेद)	1
2.	मंगलाचरण	2
3.	पुरुषसूक्तम् (ऋग्वेद)	3
4.	गुरुस्तोत्रम् (विश्वसारतंत्र)	5
5.	प्रातः स्मरणम्	6
6.	स्थितप्रज्ञ लक्षणानि (श्रीमद्भगवद्गीता)	9
7.	उपनिषत् पाठ	11
	शिव संगीत्	
8.	श्रीशिवपञ्चाक्षरस्तोत्रम् (शंकराचार्य)	16
9.	निर्वाणषट्कम् (,,)	17
10.	श्री काशी विश्वनाथ की आरती	19
11.	भजन	22
12.	लीला अमरनाथऽच—कश्मीरी (परमानन्द)	23
13.	म्वक्त कनि तारख० (कृष्ण जू राज़दान)	31
14.	ब्यल्ल तय मादल० (,,)	33
15.	शिवनाथ आनन्द अम यंथ०(,,)	,,
16.	सन्यासय हा गोसाने०	36
17.	मन स्थिर कर मन्तॅर० (ज. न. क. कमल)	37
	मातृ संगीत	
18.	श्रीमहिषासुरमर्दिनी स्तोत्रम्	38
19.	जगजननी जय जय मा० (आरती संग्रह)	41
20.	ॐ श्रीमत् ही भवऽनी० (कश्मीरी)	43
21.	पादि कमलन तल ब आसय०	44
22.	दासस दया म्य करतम०	45

23. माऽज्य शारिकाय कर दया (त्रिलोकीनाथ) 45
24. बंगला भजन 47
25. श्री रामनामसंकीर्तनम् 48
26. राम भजन (हिन्दी) 58

श्रीकृष्ण संगीत

27. अच्युताष्टकम् (शंकराचार्य) 61
28. गूकल हृदय म्योन० – कश्मीरी (परमानन्द) 62
29 गूरॅ - गूरॅ करयो० (परमानन्द) 64
30 बोज़ि बोज़ि जसदाय० (नीलकण्ठ शर्मा) 65
31. ज़गि अन्धकार चानियिन० ,, 67
32. गूकल तॅ बिन्दॅराबन० (ज. न. क. कमल) 69
33. हिन्दी कृष्ण भजन 71

श्री श्री रामकृष्ण संगीत

34. खण्डन भव बन्धन० (विवेकानन्द) 74
35. ॐ ह्रीं ऋतं त्वमचलो० ,, 75
36. श्रीनारायणी स्त्रोत्रम् 76
37. श्रीरामकृष्ण स्त्रोम् (विवेकानन्द) 77
38. ॐकारवेद्यः पुरुषः पुराणो (अभेदानन्द) 78
39. विश्वस्य धाता पुरुषस्त्वमाद्यो० ,, 80
40. ब्रह्मरूपमादि मध्य-शेष सर्व भासकं० (विरजानन्द) 82
41. हृदयकमलमध्ये राजितं० (अभेदानन्द) 84
42. विशुद्धविज्ञानमगाधसौख्यं० (प्रमददास मित्रा) 84
43. श्रीरामकृष्ण शरणं० 85
44. भव सागर तारण कारण हे० 86
45. भव भय भंजन पुरुष निरञ्जन० 86
46 आयस बॅ लोल चाने० (कश्मीरी) 87
47. कृष्ण भगवान रामकृष्ण भगवान ,, 89

48. विष्णु रूपय गदाधरय। (कश्मीरी) 91
49. रामकृष्ण कर दया वोऽञ। „ 93
50. आकाशि सिर्य प्रकाश नोऽन। „ 94
51. युथ ना छयनँ गछ़ख। „ 95
52. बंगला भजन 96
53. **श्री शारदा स्तोत्रम्** 97
54. अनन्तरूपिणि अनन्तगुणवति। 99
55. बंगला भजन 99
56. **विवेकानन्दगीतिस्तोत्रम्** (शरत् चन्द्र चक्रवर्ती) 100
57. विवेकानन्द पंचकम् (रामकृष्णानन्द) 100

विविध संकलन (कश्मीरी)

58. लल वाख (ललँ द्यद्) 101
59. गिन्दुनाह छा जिन्दँ मरुन। (परमानन्द) 106
60. वेलँ वोत मेलनुक। (कृष्ण जू) 109
61. टोठान चयँ छुख भक्तिभावस। („) 111
62. भयँ रोस्त थावतम जय सानो। („) 113
63. सज्ज़न बन मन कर कैलासँय। (कृष्ण जू) 114
64. होश दिम लगयो पंपोश पादन। („) 114
65. प्रबाथ हो आव अछि मुच़राव। („) 115
66. मनँ पोश लागय शेरे। (ज०न०क० कमल) 118
67. संसार छुय मुहँ जजाल। (शारिका देवी) 119
68. जाँफर्य पोशस छु लक्ष्मी। 120
69. क्याह ह्यकँ वनिथ। (गोविन्द कौल) 121
70. आहमो रोगे रोगे। („) 121
71. दय नो वुछान। („) 122
72. रंध मो दि अथ गंध पानस। 123
73. कष्टँ कास्तम म्य भगवान। (लक्ष्मण बुल्बुल) 124
74. घरि घरि पूज़ कर। („) 125

आराधना

(कश्मीरी, हिन्दी तथा बंगला भक्ति - गीतों सहित)

ARADANA

श्री रामकृष्ण आश्रम

शिवालय, श्रीनगर (कश्मीर)

जून 2, 1983

मूल्य

आराधना

(कश्मीरी, हिन्दी तथा बंगला भक्ति - गीतों सहित)

श्री रामकृष्ण आश्रम

शिवालय, श्रीनगर (कश्मीर)
190010

जून 2, 1983

मूल्य रु० १२/-

प्रकाशक

जानकीनाथ कौल

मन्त्री, श्री रामकृष्ण आश्रम,

श्रीनगर (कश्मीर)

सम्पादक

अनुपम कौल

मुद्रक

बस्ती आर्ट प्रेस

श्रीनगर

प्रथम संस्करण 1983

द्वितीय संस्करण 2001

ISBN 81-900842

हमारे प्रकाशन

1 मुकुन्दमाला एवं अन्य स्तोत्र रत्न (मूल्य रु० ३/-)
सम्पादक एवं टीकाकार श्री जानकीनाथ कौल 'कमल'
[अन्य स्तोत्रों में उत्पलदेव का संग्रहस्तोत्र, देवीस्तुतिः, गौरीस्तुतिः (लीलारब्ध०) जयस्तुतिः (जय नारायण०) शिवस्तुतिः (व्याप्तचराचर०), चामरार्थं शिवस्तुतिः (अतिभीषण०) आदि अनुवाद सहित हैं।]

2 ब्राह्मी विद्या (हिन्दी तथा अंग्रेजी अनुवाद सहित) मूल्य रु०१/-

3 SARADA (Souvenir - 1982) Price Rs. 10/-

4 AMBASTAVAH — Hymn to Mother of universe by Shri Jankinath Kaul *(In Press)*

प्राप्ति स्थान :—

SRI RAMAKRISHNA ASHRAMA
SHIVALAYA
P. o. Karan Nagar, Srinagar - 190010 (Kmr.)

मुद्रक

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥
यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्या संति देवाः ॥

गुरुस्तोत्रम्

गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरुवे नमः ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरुवे नमः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरुवे नमः ॥
स्थावरं जंगमं व्याप्त येन कृत्स्नं चराचरम् ।
तत्पदं दर्शित येन तस्मै श्रीगुरुवे नमः ॥
सर्वश्रुतिशिरोरत्नसमुद्भासितमूर्तये ।
वेदांतांबुजसूर्याय तस्मै श्रीगुरुवे नमः ॥
चैतन्यं शाश्वतं शान्तं व्योमातीतं निरजनम् ।
बिन्दुनादकलातीतं तस्मै श्रीगुरुवे नमः ॥
ज्ञानशक्तिसमारूढस्तत्त्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरुवे नमः ॥

अनेकजन्मसंप्राप्त कर्मेन्धनविदाहिने ।
आत्मज्ञानाग्निदानेन तस्मै श्रीगुरुवे नमः ।।

शोषणं भवसिंधोश्च प्रापणं सारसंपदः ।
यस्य पादोदकं सम्यक् तस्मै श्रीगुरुवे नमः ।।

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
तत्त्वज्ञानात्परं नास्ति तस्मै श्रीगुरुवे नमः ।।

मन्नाथः श्रीजगन्नाथो मद्गुरुः श्रीजगद्गुरुः ।
मदात्मा सर्वभूतात्मा तस्मै श्रीगुरुवे नमः ।।

गुरुरादि अनादिश्च गुरुः परमदैवतम् ।
गुरोः परतरं नास्ति तस्मै श्रीगुरुवे नमः ।।

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्ति
द्वन्द्वतीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ।।

प्रातः स्मरणम्

प्रातः स्मरामि हृदि संस्फुरद् आत्म - तत्त्वम्
सत्-चित-सुखं परमहंस-गतिं तुरीयम् ।
यत् स्वप्न–जागर–सुषुप्तम् अवैति नित्यम्
तद् ब्रह्म निष्कलम् अहं न च ~~भूसंल–घः~~ ।।
भूतसंघः

प्रातर भजामि मनसो वचसाम् अगम्यम्
वाचो विभान्ति निखिला यद् अनुग्रहेण ।
यन् 'नेति नेति' वचनैर् निगमा अवोचुस
तं देव-देवम् अजम् अच्युतम् आहुर् अगरच्यम् ॥

प्रातर नमामि तमसः परम अर्क-वर्णम्
पूर्णं सनातन-पदं पुरुषोतमाख्यम् ।
यस्मिन इदं जगद् अशेषम् अशेष-मूर्तौ
रज्जवां भुजंगम इव प्रतिभासितं वै ॥

समुद्र-वसने ! देवि ! पर्वत-स्तन-मण्डले !
विष्णु-पत्नि ! नमस् तुभ्यम्, पादस्पर्श क्षमस्व मे ।
सरस्वति महाभागे विद्ये कमल लोचने ।
विश्वरूपे विशालाक्षि विद्यां देहि नमोऽस्तुते ॥

या कुन्देन्दु-तुषार-हार-धवला या शुभ्रवस्त्रावृता,
या वीणा वरदण्ड-मण्डितकरा या श्वेत-पद्मासना ।
या ब्रह्माच्युत शंकर-प्रभृतिभिर् देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेष-जाड्यापहा ॥

वक्र-तुण्ड ! महाकाये ! सूर्य-कोटि-सम-प्रभ ! ।
निर्विघ्नं कुरु मे देव ! शुभ-कार्येषु सर्वदा ॥

शान्ताकारं भुजग-शयनं पद्म-नाभं सुरेशम्
विश्वाधारं गगन-सदृशं मेघ-वर्णं शुभाङ्गम् ।
लक्ष्मी-कान्तं कमल-नयनं योगिभिर् ध्यान-गम्यम्
वन्दे विष्णुं भव-भय-हरं सर्व-लोकैक-नाथम् ॥

कर–चरण–कृतं वाक्–कायजं कर्मजं वा
श्रवण–नयनजं वा मानसं वाऽपराधम् ।
विहितम् अविहितं वा सर्वम् एतत् क्षमस्व
जय जय करुणाब्धे ! श्रीमहादेव ! शम्भो ! ॥
न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम् ।
कामये दुःख–तप्तानाम् प्राणिनाम् आर्ति-नाशनम् ॥
स्वस्ति प्रजाभ्यः परिपालयन्ताम्
न्यायेन मार्गेण महीं महीशाः ।
गो–ब्राह्मणेभ्यः शुभं अस्तु नित्यम्
लोकाः समस्ताः सुखिनो भवन्तु ॥
नमस् ते सते ते जगत्–कारणाय
नमस् ते चिते सर्व–लोकाश्रयाय ।
नमोऽद्वैत–तत्त्वाय मुक्ति–प्रदाय
नमो ब्रह्मणे व्यापिने शाश्वताय ॥
त्वमेकं शरण्यं त्वमेकं वरेण्यं
त्वमेकं जगत्–पालकं स्वप्रकाशम् ।
त्वमेकं जगत् कर्तृ-पातृ-प्रहर्तृ
त्वमेकं परं निश्चलं निर्विकल्पम् ।
भयानां भयं भीषणं भीषणानाम्
गतिः प्राणिनां पावनं पावनानाम् ।
महोच्चैः पदानां नियन्तृ त्वमेकं
परेषां परं रक्षणं रक्षणानाम् ॥
वयं त्वां स्मरामो वयं त्वां भजामो
वयं त्वां जगत्–साक्षि–रूपं नमामः ।
सद् एकं निधानं निरालंबम् ईशम्
भवाम्भोधि–पोतं शरण्यं व्रजामः ॥

यं ब्रह्मा-वरुणेन्द्र-रुद्र-मरुतः स्तुन्वन्ति दिव्यै-स्तवैर्
वेदैः सांग-पद-क्रमोपनिषदैर् गायन्ति यं सामगाः ।
ध्यानावस्थित-तद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

स्थितप्रज्ञ - लक्षणानि

अर्जुन उवाच :-

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ! ।
स्थितधीः किं प्रभाषेत् किमासीत व्रजेत किम् ॥

श्री भगवान् उवाच :-

प्रजहाति यदा कामान् सर्वान् पार्थ ! मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥

दुःखेष्वनुद्विग्न-मनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर् मुनिर् उच्यते ॥

यः सर्वत्रानभिस्नेहस् तत् तत् प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥

75. यस निश सु प्रकाश द्राव० (वासुदेव) 126
76. सोऽख शब्द दर्शन चाने० (ठाकुर जू मनवटी) 127
77. शोकरो डुंग लाय सोदॅरस० 128
78. शरीर ज़ोलनम अम्य हा लोलॅ नारन(रहीम सॉब)129
79. अज़ वाति बूज़ुम मोलॅ म्योन० /ज़िन्दा कौल/ 130
80. वछ़िम गथ चाऽञ दैवागथ० (,,) 131
81. स्मरण पनॅञ दिच्ऽनम० (,,) 131
82. पानय म्य पान हाऽविथ० (,,) 132
83. आमॅच् मनस रॅच वासना० 133
84 पांछ दोह यावनॅनि आवणनि सूरी० (कृष्ण जू) 134
85. हे दय ! बोज़ कनय च़यय रोस्त० (विष्णु जी) 135
86. यियि कति भक्तिस मनि मंज़ भाव० (परमानन्द) 136
87. रामकृष्ण मनॅसॅय मन्ज़ वथॅरावय० 137
88. कर्मभूमिकायि दिज़ि धर्मुक बल० (परमानन्द) 138
89. पांच् त्रे भागलिस करारदादस० (,,) 141
90. अर्धरातन गुल्य गण्डिथ बोज़ि ज़ार० 142
91. ईकुत म्य भास्योम० (ज. न. क. कमल) 143
92. च् शमा छख बॅ छ़स परवान चोनुय० 145
93. ज़ीवो संसार सोरुय भ्रम छुय० (जीवन सॉब) 145
94. द्वैत वुपशम शान्त शिव शाय० (ज.न.क. कमल) 147
95. पोऽतॅ ज़ूने मोऽत वुज़नोवुम० (आफताबजी) 148
96. लगय पादन बॅ पऽरी राजियॅनि रानिब्रॉरी० 150
97. माऽज भवाँञ सॅहस प्यठ सवार (ज. ल. सराफ) 151
98. सध्यासमय दीप / चोंग / ज़ॉलिथ 154

यततो ह्यपि कौन्तेय ! पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥

ध्यायतो विषयान् पुंसः संगस्तेषूपजायते ।
संगात्संजायते कामः कामात्क्रोधोऽभिजायते ॥

क्रोधाद् भवति संमोहः संमोहात् स्मृति-विभ्रमः ।
स्मृति-भ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

राग–द्वेष–वियुक्तैस्तु विषयान् इन्द्रियैश्चरन् ।
आत्मवश्यैर् विधेयात्मा प्रसादं अधिगच्छति ॥

प्रसादे सर्व-दुःखानां हानिर् अस्योपजायते ।
प्रसन्न–चेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥

नास्ति बुद्धिर् अयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिर् अशान्तस्य कुतः सुखम् ॥

इन्द्रियाणां हि चरतां यन्मनोनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर् नावमिवाम्भसि ॥

तस्माद् यस्य महाबाहो ! निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जागर्ति भूतानि सा निशा पश्यतो मुनेः ॥

आपूर्यमाणं अचल–प्रतिष्ठं
समुद्रं आपः प्रविशन्ति यद्वत् ।

तद्वत् कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ।।

विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्ति अधिगच्छति ।।

एषा ब्राह्मी स्थितिः पार्थ ! नैनां प्राप्य विमुह्यति ।
स्थित्वाऽस्यां अन्तकालेऽपि ब्रह्म निर्वाणं ऋच्छति ।।

उपनिषत् पाठ

ॐ ईशावास्यं इदं सर्वं यत्किञ्च जगतां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम् ।।

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत् त्वं पूषन् ! अपावृणु सत्य - धर्माय दृष्टये ।।

अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वायुयानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नम उक्तिं विधेम ।।

श्रेयश्च प्रेयश्च मनुष्यं एतः
तौ संपरीत्य विविनक्ति धीरः ।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते
प्रेयो मन्दो योगक्षेमाद् वृणीते ।।

सर्वे वेदा यत्पदं आमनन्ति
तपांसि सर्वाणि च यद् वदन्ति ।
यद् इच्छन्तो ब्रह्मचर्यं चरन्ति
तत् ते पदं संग्रहेण ब्रवीमि ॐ इत्येतत् ॥

आत्मानं रथिनं विद्धि शरीरं रथ एव तु ।
बुद्धि तु सारथिं विद्धि मनः प्रग्रहं एव च ॥
इन्द्रियाणि हयान आहुर् विषयांस् तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर् मनीषिणः ॥
विज्ञानसारथिर् यस् तु मनः प्रग्रहवान् नरः ।
सोऽध्वनः पारम् आप्नोति तद् विष्णोः परम पदम् ॥
उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया
दुर्गं पथस् तत् कवयो वदन्ति ॥
अग्निर् यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव ।
एकस् तथा सर्व-भूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश् च ॥
वायुर् यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव ।
एकस् तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश् च ॥

सूर्यो यथा सर्वलोकस्य चक्षुर्
न लिप्यते चाक्षुषैर् बाह्यदोषैः ।
एकस् तथा सर्वभूतान्तरात्मा
न लिप्यते लोकदुःखेन बाह्यः ॥

एको वशी सर्वभूतान्तरात्मा
एकं रूपं बहुधा यः करोति ।
तम् आत्मस्थं येऽनुपश्यन्ति धीरास्
तेषां सुखं शाश्वतं नेतरेषाम् ॥

नित्योऽनित्यानां चेतनश् चेतनानाम्
एको बहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्
तेषां शान्तिः शाश्वती नेतरेषाम् ॥

न तत्र सूर्यो भातिः न चन्द्र तारकं
नेमा विद्युतो भान्ति कुतोऽयं अग्निः ?
तमेव भान्तं अनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥

तवः श्रद्धे ये ह्युपवसन्त्यरण्ये
शान्ता विद्वांसो भैक्षचर्यां चरन्तः ।
सूर्यद्वारेण ते विरजाः प्रयान्ति
यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥

परीक्ष्य लोकान् कर्मचितान्
ब्राह्मणो निर्वेदं आयान् 'नास्त्यकृतः कृतेन' ।
तद्विज्ञानार्थं स गुरुं एवाभिगच्छेत्
समित्-पाणिः श्रोत्रियं ब्रह्म-निष्ठम् ॥

तस्मै स विद्वान् उपसन्नाय सम्यक्
प्रशान्त-चित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यं उच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत् ॥

भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥

ब्रह्मैवेदं अमृतं पुरस्ताद् ब्रह्म
पश्चाद् ब्रह्म दक्षिणतश् चोत्तरेण ।
अधश् चोर्ध्वं च प्रसृतं ब्रह्मैवेदं
विश्वं इदं वरिष्ठम् ॥

सत्येन लभ्यस् तपसा ह्येष आत्मा
सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् ।
अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो
यं पश्यन्ति यतयः क्षीणदोषाः ॥

सत्यमेव जयते नानृतम्
सत्येन पन्था विततो देवयानः ।
येनाक्रमन्ति ऋषयो ह्याप्तकामा
यत्र तत् सत्यस्य परमं निधानम् ॥

नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन ।

यमेवैष वृणुते तेन लभ्यस्
तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥

नायमात्मा बलहीनेन लभ्यो
न च प्रमादात् तपसो वाप्यलिंगात् ।
एतैर् उपायैर् यतते यस्तु विद्वांस्
तस्यैष आत्मा विशते ब्रह्मधाम ॥

सम्प्राप्यैनं ऋषयो ज्ञान-तृप्ता:
कृतात्मानो वीतरागाः प्रशान्ता: ।
ते सर्वगं सर्वतः प्राप्य धीरा
युक्तात्मनः सर्वं एवाविशन्ति ॥

वेदान्त-विज्ञान–सुनिश्चितार्था:
संन्यास–योगाद् यतय: शुद्ध-सत्त्वा: ।
ते ब्रह्म–लोकेषु परान्तकाले
परामृत: परिमुच्यन्ति सर्वे ॥

यथा नद्य: स्यन्दमाना: समुद्रे
अस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद् विमुक्तः
परात्परं पुरुषं उपैति दिव्यम् ॥

स यो ह वै तत् परमं ब्रह्म वेद, ब्रह्मैव भवति
नास्याब्रह्मवित् कुले भवति ।
तरति शोकं, तरति पाप्मानं
गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन ॥

एतं हि वाव न तपति 'किम् अहं साधु नाकरवम् ।
किम् अहं पापं अकरवम्' इति ॥

युवा स्यात् साधु युवाध्यायकः
अशिष्ठो द्रढिष्ठो बलिष्ठः ।
तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् ॥

बलं वाव विज्ञानाद् भूयः, अपि ह शतं विज्ञानवताम् एको बलवान् आकम्पयते । स यदा बली भवति अथोत्थाता भवति, उतिष्ठन् परिचरिता भवति, परिचरन् उपसत्ता भवति, उपसीदन् द्रष्टा भवति, श्रोता भवति, मन्ता भवति, बोद्धा भवति, कर्ता भवति, विज्ञाता भवति ॥

"शिव संगीत"

॥ श्रीशिवपञ्चाक्षरस्तोत्रम् ॥

नागेन्द्रहाराय त्रिलोचनाय
भस्मांगरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय
तस्मै 'न' काराय नमः शिवाय ॥

मन्दाकिनीसलिलचन्दनचर्चिताय
नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय
तस्मै 'म' काराय नमः शिवाय ॥

शिवाय गौरीवदनाब्जवृन्द-
सूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय
तस्मै 'शि' काराय नमः शिवाय ॥

वसिष्ठकुम्भोद्भवगौतमार्य-
मुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय
तस्मै 'व' काराय नमः शिवाय ॥

यक्षस्वरूपाय जटाधराय
पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय
तस्मै 'य' काराय नमः शिवाय ॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

निर्वाणषट्कम्

मनोबुद्ध्यहंकारचित्तानि नाहं
न च श्रोत्रजिह्वे न च घ्राणनेत्रे ।
न च व्योमभूमी न तेजो न वायु-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

न च प्राणसंज्ञो न वै पञ्चवायु-
र्न वा सप्तधातुर्न वा पंचकोषाः ।
न वाक्पाणिपाद न चोपस्थपायू
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

न मे द्वेषरागौ न मे लोभमोहौ
मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्ष-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

न पुण्यं न पापं न सौख्यं न दुःखं
न मंत्रो न तीर्थं न वेदा न यज्ञाः ।
अहं भोजनं नैव भोज्यं न भोक्ता
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

न मृत्युर्न शंका न मे जातिभेदः
पिता नैव मे नैव माता न जन्म ।
न बन्धुर्न मित्रं गुरुर्नैव शिष्य-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

अहं निर्विकल्पो निराकाररूपो
विभुर्व्यापि सर्वत्र सर्वेन्द्रियाणि ।
सदा मे समत्वं न मुक्तिर्न बन्धः
चिदानन्दरूपः शिवोऽहम् ॥

श्री काशी-विश्वनाथ की आरती

हरि ॐ जय गंगाधर हरशिव जय गिरिजाधीश,
शिव जय गौरीनाथ ।
त्वं मां पालय नित्यं २ कृपया जगदीश,
ॐ हर हर हर महादेव ॥१॥

कैलासे गिरिशिखरे कल्पद्रुमविपिने शिव कल्पद्रुमविपिने
गुंजति मधुकरपुंजे २ कुंजवने गहने ।
कोकिलकूजति खेलति हंसावलिललिता,
शिव हंसावलिललिता ।
रचयति कलाकलापं २ नृत्यति मुदसहिता ।
ॐ हर हर हर महादेव ॥२॥

तस्मिन् ललितसुदेशे शाला मणिरचिता,
शिव शाला मणिरचिता ।
तन्मध्ये हरनिकटे २ गौरी मुदसहिता ।
क्रीडां रचयति भूषारंजित निजमीशं,
शिव रंजितनिजमीशम् ।
इन्द्रादिकसुरसेवित-ब्रह्मादिकं मुनिसेवित-
प्रणमति ते शीर्षम् ।
ॐ हर हर हर महादेव ॥३॥

विबुधवधूर्बहुनृत्यंत हृदये मुदसहिता,
शिव हृदये मुदसहिता ।

किन्नरगायनकुरुते २ सप्तस्वरसहिता ।

धिनकत थै थै धिनकत मृदंग वादयते,

शिव मृदंगवादयते ।

क्वण क्वण ललिता वेणुं २ मधुरं नादयते ।

ॐ हर हर हर महादेव ॥४॥

रुण रुण चरणे रचयति नूपुरमुज्जवलितं

शिव नूपुरमुज्वलितम् ।

चक्रावर्ते भ्रमयति २ कुरुते तां धिकतां ।

तां तां लुपचुपतालं तालं नादयते, शिव डमरूवादयते ।

अंगुष्ठांगुलिनादं २ लास्यकतां कुरुते ।

ॐ हर हर हर महादेव ॥५॥

कर्पूरद्युतिगौरं पंचाननसहितं, शिव पंचाननसहितम् ।

त्रिनयनशशिधरमौलिं २ विषधरकण्ठयुतम् ।

सुन्दरजटाकलापं पावकयुतभालं,

शिव पावकयुतभालम् ।

डमरुत्रिशूलपिनाकं २ करधृतनृकपालम् ।

ॐ हर हर हर महादेव ॥६॥

शंखनिनादं कृत्वा झल्लरि नादयते,

शिव झल्लरि नादयते ।

नीराजयते ब्रह्मा नीराजयते विष्णुर्वेद ऋचां पठते ।

इति मृदुचरणसरोजं हृदि कमले धृत्वा,

शिव हृदि कमले धृत्वा ।

अवलोकयति महेशं, शिवलोकयतिसुरेशं ईशमभिनत्वा ।

ॐ हर हर हर महादेव ।।७।।

रुण्डै रचयति मालां पन्नगमुपवीतं, शिव पन्नगमुपवीतम्

वामविभागे गिरिजा, वामविभागे गौरी,

रूपं ह्यतिललितम् ।

सुन्दरसकलशरीरे मनसिजकृतभस्माभरणं

शिवकृतभस्माभरणम् ।

इति वृषभध्वजरूपं, हर शिवशंकररूपं,

तापत्रयहरणम् ।

ॐ हर हर हर महादेव ।।८।।

ध्यानं आरतिसमये हृदये-इतिकृत्वा, शिव हृदये इतिकृत्वा ।

रामं त्रिजटानाथं, शम्भो हर त्रिजटानाथं, ईशं अभिनत्वा ।

संगीतमेवं प्रतिदिनपठनं यः कुरुते, शिवपठनं यः कुरुते ।

शिवसायुज्यं गच्छति, हरसायुज्यं गच्छति,

भक्त्या यः शृणुते ।

ॐ हर हर हर महादेव ।।९।।

ॐ जय गंगाधर हर शिव जय गिरिजाधीश

शिव जय गौरीनाथ ।

त्वं मां पालय नित्यं त्वं मां पालय शम्भो, कृपया जगदीश ।

ॐ हर हर हर महादेव ।।१०।।

●●

बंगला भजन

डमरू हर करे बाजे बाजे,
त्रिशूल धर-अंग भस्म भूषण व्याल माला गले विराजे।
पचवदन पिनाक धर शिव, वृषभ वाहन भूतनाथ,
रुण्ड-मुण्ड गले विराजित अजर अमर दिगम्बर रे।।

●

हर हर हर भूतनाथ पशुपति,
योगीश्वर महादेव शिव पिनाकपाणि ।
ऊर्ध्व जलत जटा जाल, नाचत व्योमकेश भाल,
सप्त भुवन धरत ताल टलमल अवनी ।।

●

ताथैया ताथैया नाचे भोला, बम् बम् बाजे गाल ।
डिमि डिमि डिमि डमरू बाजे, दुलिछे कपाल माल ।।
गरजे गंगा जटा माझे, उगरे अनल त्रिशूल राजे ।
धक् धक् धक् मौलिबन्ध ज्वले शशांक भाल ।।

●

तुंहि जगत गुरु तुंहि परमेश्वर,
आदि अनादि पिनाकधर शंकर ।
तुंहि भरण-पोषण कर सबको तारण,
सृजन प्रलय तुमसे होये विश्वेश्वर ।।
भाल चंद रुण्ड माल शोभित,
वृषभ वाहन और जग अघ हर ।
जटाजूट मांझ गंगा विराजित
धन्य धन्य महादेव तुंहि योगेश्वर ।।

"कश्मीरी भजन"

लीला अमरनाथच

—महाकवि परमानन्द

१. मन थिर कर पूज़ुन प्रभू
मंतर पर शिव - शम्भू

२. दीह् गोफि सत-च्यथ आनन्द लिंग
मन पीठस प्यठ ब्यूठ निसंग
लूख दप्यतनस कैलास श्रंग —मन०

३. कन थव सरस्वती छ्य वनन
वन्य वन्य पान छ्‌यना सनन
नाम रूप वनि भ्योन भ्योन वनन —मन०

४. लीला यि छ्य अमरनाथचिय
दीह्-दार सान ईकान्तचिय
शम-दम गोफ प्रशान्तच्चिय —मन०

५. 'त्राहि माम' पर यात्रा च कर
ह्र-म्वख गननुय पान वर
गोंफि मेन यि गुफ छे बराबर —मन०

६. गोड गणपतयारुक गणीश
दूर मो ज़ान् रूज़िथ चे निश
मूलाधार द्वारुक महीश —म०

७. ब्रह्मा युस सृष्टि करतार
स्वाधिष्ठान शुराहयार
षठ्दल शन्मुख ज़न कुमार —मन०

८. शिवपोरि फेर कुण्डलने
फेर वज्र प्राण तत ज़ल कनै
सथ समुदुर सनि वोगने —मन०

९. अष्टदल सु द्राव पम्पोष डल
यूर्य फेर नोरकुन मो च़ डल
व्यच़ार अछ़ त़ संसार च़ल —मन०

१०. ह्यू र ह्यू र पख न्यूर न्यूर वात
दूर प्योमुत छुक कव वशात् ?
गथ प्रावनच बोज़ कथ त बाथ —मन०

११. तीर्थ रोस्त मा कुनि कांह पोदा
वेदन ति ॐकार विन पदा
ज़ीवन मुक्त परमात्मा —मन०

१२. नाभिदीशि दशदल संगमस
यम्य चाऽव्य लूख सत्संग मस
कृष्णस स्थावर - ज़ंगमस —मन०

१३. अंद्य अंद्य फेर चक्रवर सय
प्रदिक्षण कर च़ मन्दर सय
दीव पूज़ श्याम सोन्दर सय —मन०

१४ मन्दर मुछ त वुछ त च़न्द्रयार
सांपनिय तति ह्र च़न्द्रयार
विजयेश्वरी ज़न्म ज़न्म पार —मन०

१५ कऽज त्रऽविथ वात थऽजवोर
लऽज तति शिव जटा च्वपोर
अनाहत मण्डलस थाव खोर —मन०

१६ छ़चफ छुड ह्यथ वात छोण्डबल
विशुद्ध च़क्रच ज़ीव थल
दीव-पूज़ कर ज़ीव-भाव च़ल —मन०

१७ मंज्य वात खिलनस त खेलनस
पानय ज़ि पानस मेलनस
तील ज़न तेलस तेलनस —मन०

१८ वालखय वति वति वीरसिरन
तति छिय न वातान वीर सिरन
वर्ज वाव सऽत्य बलवीर इरन —मन०

१९ पुशराव पान परमेश्वरस
प्रदिक्षरण कर तत मन्दरस
वऽतिथ रोज़ मामलीश्वरस —मन०

२० मन निश दूर कर लय व्यक्षीप
नऽविथ गरणीशस सऽर्य लीप
च़लनय त सुय गव रत्नदीप —मन०

२१ भर्ग तीर्थ प्यठ छुय स्वर्गद्वार
वर्ग निश मशिरिथ मो च़ प्रार
भाव अर्घ-पुष्प पूज़ा छे सार —मन०

२२ रेन्ज़ल त्रऽविथ रीन्ज़्य पल
वऽतिथ निशानस मो च़ डल
कर्मस त धर्मस सूर फल —मन०

२३ कण्ठ दीश युस च्वदाह् भवन
नील गंगि प्यठ बोज़ वावजन
तति तोर पवनय स्रोत दवन —मन०

२४ मन्ज़िल छु मंज्य मज्य वारयाह
छोट वनुन मोट बोज़ वारयाह
अक्रिया द्वारच यिय क्रिया —मन०

२५ लऽजिम छु यिय यिय तिय वनव
नन वर्य्य वातव कोर वनव
थकि युस त दपि पगाह् वनव —मन०

२६ ईश-दीश उत्तम शोषनाग
ह्यकखय त तत्य द्यन-राथ ज़ाग
राग त्राव प्राव महा वैराग —मन०

२७ त्याग पंचक्रत पंचतरंग
सत-समुद्रकिय च्यथ-तरंग
पद्म-नाभस छिम यिम ति रंग —मन०

२८ खस्त अस्त अस्त पंचालसय
सोऽहं भैरव-बालसय
टख युथ न लगि अति लालसय —मन०

२९ ज़िन्द रोज बोज ज़िन्दय मरुन
गर्भ-यात्रायि अपोर तरुन
सतिये छु ततिये शिव वरुन —मन०

३० शोज़रिथ संकल्प निशि मन
रशि-राग रोस्त काल-दीश मन
शिहलिथ ईश अनीश मन —मन०

३१ छिय परा त पश्यन्ती पशन
मध्यमा त वेखरी मा पशन
यिछ़ अवस्था छे तप-ऋषन —मन०

३२ युस छु परमात्मा त वटकनाथ
यस छिय भैरव विताल साथ
यम्य कऽरख स्वयंवर वशात् —मन०

३३ भाव अमरावतिये च़ नाव
मल बभूत छल गृहस्थ भाव
शिव-पादन पान पुशिराव —मन०

३४ रूदमुत गुफि युस शुद्ध त बुद्ध
नव निध अधीन तस त अष्टसिद्ध
आकाशवत् केंह न घट त बड —मन०

३५ नंग मोत हंग तय मंग रोज़
ईश्वर दर्शन शब्द बोज़
लय कर त ध्यान दयि घर सोज —मन०

३६ गुफि मंज गुफि वात पनञे
त्राव दीवियि त दिवता अन्ये
छ्यनि छन यिम बभूत कञे —मन०

३७ कनि मंज लाल सुय मञि मंज़
छ्रनिरुक छोञ छोञ रुनि मंज
तप कर दीह अरण्य मंज —मन०

३८ सोऽहम्-शब्द प्रयम प्रणवय
आज्ञा शिखरस त्राव रवय
तालव कपूत आलवय —मन०

३९ सहस्रदल लयगत च़् प्राव
ब्रह्मरंध्रस छु निष्कल स्वभाव
दम चे दमाले कर त क्राव —मन०

४० पकवञ छि द्वारस मथ मथान
थान गव ज़ि यति बिहान वोथान
समाधि मंज़ युथ ह्यू व्युथान —मन०

४१ पननुय पान पानस च़मुन
यिय च़मुन तिय समुन तिय शमुन
अऽत्य वुहुन लोलनार अऽत्य हमुन —मन०

४२ युथ थान छुन प्रोवमुत यमन
तिमवय ज़ोन ब्रून्ठच आव यिमन
परमात्मा परज़ऽनिथ यि मन —मन०

४३ जिसमें जोगी आ पडा
जाग्रत स्वप्नय पिंगला इडा
उतरा वहां कोई ना चढा —मन०

४४ भंवरा कमल में जब वडा
अभिनासी नाही सब कडा
और था कोई ना बडा —मन०

४५ तँति फोरुवुन अनाहत नाद
स्वप्न–अन्त त सुषुप्तायि आद
तुर्या त तुर्यातीत समाध —मन०

४६ फीरिथ इडायि किन्य संगमस
रस पूरणमय खोतमुत त वस
तँति श्राद करुन छुय यस ब तस —मन०

४७ गोफ चलु चु त्रऽविथ तस शिवस
यस रोस्त छु न कांछा चितस
पान पुशिरावुन छुय च्य तस —मन०

४८ शिव शिव ध्यान निश मो चु डल
चम छय प्रकृत पुरुषस म वल
कोर यि चित्रकार मायायि छल —मन०

४९ यव किञ शिव ज़ानख च्वपऽर्य
रोज़नय न कँह पापऽञ भार्य
भवसर चे सार छुय शिव-तार —मन०

५० युन गछुन छुय चिन्मात्रा
ज्ञानियस यिय वुछुन यात्रा
पननी छे वननी वारता —मन०

५१ तृप्त नव द्वार वात नव दल
वऽतिथ चलिय ज़न्मच वदल
दीह यात्रा गयि यिय सफल —मन०